## चतुर्दशः पाठः

# वीरबाला

मेवाडाधिपतेः उदयसिंहस्य पुत्रः महाराणाप्रतापः पितृसदृशः विशालकायः वीरः पराक्रमी चासीत्। सः प्रतिज्ञां कृतवान् यदहम् अकबरम् पराजित्य यावत् चित्तौड़दुर्गं न जेष्यामि तावद् पर्णे भोजनं भूमौ च शयनं करिष्यामि। परं परिवारे समागतान् दुःखान् अवलोक्य सः स्व प्रतिज्ञां परिवर्तितुमैच्छत् किन्तु तत्पुत्र्याः चम्पायाः जीवनोत्सर्गेण महाराणाप्रतापः स्वास्थिरविचारान् परावर्त्य मेवाड़गौरवरक्षणाय प्रतिज्ञां कृतवान्। भारतीयबालानां गौरवं व्यनक्ति एषः पाठः।

**शिक्षकः** – भो छात्राः! अस्माकं भारतदेशे बह्व्यः वीरबालाः चम्पा–कृष्णा–वीरमती–पद्मादयः सञ्जाताः।

**आनन्दः** – आचार्य! एतासु केयं चम्पा ? कृपया तद्विषये कथयतु।

**शिक्षकः** – आम्! शृणोतु, किं भवन्तः महाराणाप्रतापविषये जानन्ति ?

**वेदान्तः** – किं स एव महाराणाप्रतापः यः भारतवर्षभूषणः स्वदेशस्वातन्त्र्याभिमानी च?

**शिक्षकः** – आम् तस्यैव पुत्री आसीत् चम्पा।

**आरती** – तस्याः विषये विस्तरेण न जानीमः।

**शिक्षकः** – शृण्वन्तु। महाराणाप्रतापः अकबरस्य अधीनतां न स्वीकृतवान्। अनेन कारणेन अरावलीपर्वतस्य उपत्यकायां, गुहासु वनेषु च सपरिवारं परिभ्रमन् अत्यधिकं कष्टम् अन्वभवत्।

**भरतः** – तत्र ते कुत्र स्वपन्ति स्म? किञ्च खादन्ति स्म ?

**शिक्षकः** – अहोरात्रं पदातिरेव ते चलन्ति स्म भूमौ शिलायां वा स्वपन्ति स्म। बहुधा उपवासं कृत्वा यदा कदा बदरीफलानि वा तृणरोटिकांश्च खादन्ति स्म। नैकवारम् ईदृशः समयः आगतः यदा तृणरोटिकाम् अपि त्यक्त्वा पलायनार्थं शत्रुभिर्विवशीकृताः। तस्मिन् काले प्रतापस्य पुत्री चम्पा एकादशवर्षीया पुत्रश्च चतुर्वर्षीयः आस्ताम्।

**शालिनी** – आचार्य! यदि तयोः विषये कापि वार्ता अस्ति तर्हि नूनं कथयतु।

**शिक्षकः** – एकदा राजकुमारः चम्पा च नदीतटे क्रीडतः आस्ताम्। तदैव राजकुमारः क्षुधापीडितः अभवत्। सः रोटिकां याचमानः रोदितवान्। सः न जानाति स्म यत् रोटिकायाः ग्रासमेकमपि नास्ति। चम्पा तं कथां श्रावयित्वा विनोदयामास। राजकुमारः बुभुक्षितः एव सुप्तवान्।

**प्रियङ्का** – (सोत्साहेन पृच्छति) तदा किम् अभवत् ?

**शिक्षकः** – शृणवन्तु! सुप्तम् अनुजम् अङ्के नीत्वा चम्पा शयनाय मातुः समीपम् आगत्य पितरं चिन्तामग्नम् अपश्यत् अपृच्छच्च भवान् किमर्थं चिन्तातुरोऽस्ति? तदा तेनोक्तम्–सुते! अस्माकं गृहे एकः अतिथिः आगतः, किं चित्तौड़महाराणागृहात् सः अनश्नन् एव गच्छेत्? तदा चम्पा अवदत् –पितः! भवान् मा चिन्तयतु। ह्यः भवता दत्तं रोटिकाद्वयं सुरक्षितम् अस्ति। मे बुभुक्षा नास्ति। भवान् रोटिकाद्वयं तस्मै ददातु।

**सर्वेशः –** ततः किम् अभवत् ?

**शिक्षकः –** तदनन्तरं चम्पा पाषाणतले संरक्षितां तृणरोटिकाम् आनीय अतिथये ददाति अतिथिः उपभुज्य गतवान्। परन्तु स्वपरिवारं प्रति आगतान् कष्टान् अवलोक्य उद्वेलितः महाराणा स्वप्रतिज्ञां परित्यज्य अकबरस्याधीनता विषये पत्रमलिखत्।

**प्रभा –** तदनन्तरं किं जातम् ?

**शिक्षकः –** तस्यै बालायै नैकदिनान्तराले याः तृणरोटिकाः मिलन्ति स्म ताः अपि अनुजं भोजयति स्म। अनेन कारणेन क्षुत्क्षामा वीरबाला चम्पा अति दुर्बलतां प्राप्ता। एकदा दौर्बल्यात् सा मूर्च्छिता जाता। तदा महाराणाप्रतापः ताम् अङ्के उत्थाय रुदन्नवदत्-पुत्रि! इतोप्यधिकं दुःखम् तुभ्यं न दास्यामि। मया अकबरस्य कृते पत्रं लिखितम्। अर्धचेतनायाम् इदम् पितुर्वाक्यं श्रुत्वैव सा पितरमवदत्-तात! भवान् किं कथयति? अस्माकं जीवनरक्षणाय दासतां स्वीकरिष्यति भवान्। किं वयं कदापि न मरिष्यामः ? देशस्य अवमानं मा करोतु! देशस्य कुलस्य च गौरवरक्षार्थं लक्षवारमपि यदि वयं प्राणानुत्सृजामः तदपि न्यूनमस्ति। अतः मम आग्रहः एषः यत् भवान् कदापि अकबरस्य अधीनतां मा स्वीकरोतु। वीरबाला चम्पा एवं वदन्ती एव महाराणाङ्के चिरनिद्रां गता। ततः महाराणाप्रतापः पराधीनतायाः विचारम् अत्यजत्। इत्थं चम्पया स्वजीवनोत्सर्गेण न केवलं महाराणाप्रतापस्य विचारपरिवर्तनम् अपितु मेवाड़गौरवस्य रक्षणमपि विहितम्।

## शब्दार्थः

| | | | | | |
|---|---|---|---|---|---|
| बह्व्यः | – | अनेक | अनश्नन् | – | बिना खाए |
| वृत्तम् | – | घटना (कथा) | बुभुक्षा | – | भूख |
| ह्यः | – | बीता हुआ कल | प्राणानुत्सृजामः | – | हम प्राणों को छोड़ देंगे |
| उद्वेलितः | – | क्षुब्ध हुआ | गौरवरक्षार्थम् | – | सम्मान रक्षा के लिये |
| उत्सर्गः | – | त्याग | क्षुत्क्षामा | – | भूख से दुबली |
| विस्तरेण | – | विस्तार से | | | |

## अभ्यासः

### (1) एकपदेन उत्तरं लिखत –

(क) वीरबालायाः नाम किम् ?

(ख) चम्पायाः पितुः नाम किम् ?

(ग) रोटिकाद्वयं कुत्र स्थापितम् ?

### (2) एकवाक्येन उत्तरं लिखत –

(क) अस्माकं देशे काः काः वीरबालाः जाताः ?

(ख) प्रतापेन का प्रतिज्ञा कृता ? ?

(ग) चम्पया रोटिकाद्वयं किमर्थं संरक्षिता ?

(घ) राजकुमारः कथं सुप्तवान् आसीत् ?

(ङ) उद्वेलितः प्रतापः किं कर्तुमुद्यतः अभवत् ?

## (3) अधोलिखितप्रश्नानाम् उत्तराणि लिखत –

(क) महाराणाप्रतापस्य प्रतिज्ञा का आसीत् ?

(ख) चम्पा केन कारणेन मूर्च्छिता जाता ?

(ग) महाराणाप्रताप: किमर्थं चिन्तामग्न: आसीत् ?

## (4) यथायोग्यं योजयत –

| | (अ) | (आ) |
|---|---|---|
| (क) | महाराणाप्रताप: | पाषाणतले |
| (ख) | चम्पा | उपत्यकायाम् |
| (ग) | राजकुमार: | प्रतापस्य पुत्री |
| (घ) | अरावलीपर्वतस्य | क्षुधा पीडित: |
| (ङ) | रोटिकाद्वयम् | वीर: साहसी च |

## (5) शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत–

(क) अरावलीपर्वतस्य उपत्यकायां महाराणाप्रताप: एकाकी आसीत्। ☐

(ख) अतिथि: महाराणागृहात् अनश्नन् गतवान्। ☐

(ग) चम्पा स्वभागस्य रोटिकां स्वानुजाय ददाति स्म। ☐

(घ) महाराणाप्रताप: अधीनताविषये पत्रं लिखितवान्। ☐

## (6) उचितविकल्पेन वाक्यानि पूरयत –

(क) अरावलीपर्वतस्य . . . . . . . . . . . . . . कष्टमनुभूतम्। (उपत्यकायां / गुहायाम्)

(ख) पाषाणतले . . . . . . . . . . . . . . संरक्षिता आसीत्। (रोटिका / रोटिकाद्वयं)

(ग) चम्पामूर्च्छिता जाता . . . . . . . . . . . . . . । (अश्नन् / अनश्नन्)

(घ) कष्टान् अवलोक्य महाराणाप्रताप: उद्वेलित: . . . . . . . . . . .। (जाता / जात:)

(ङ) राजकुमार: . . . . . . . . . . . . . . पीडित: सुप्तवान्। (बुभुक्षया / पिपासया)

## (7) कोष्ठकस्थै: शब्दै: वाक्यानि रचयत –

| यथा | घटना | एषा घटना महाराणाप्रतापकालीना आसीत् |
|---|---|---|
| (क) | चम्पा | |
| (ख) | राजकुमार: | |
| (ग) | शपथ: | |
| (घ) | पत्रम् | |
| (ङ) | वीर: | |

## (8) अधोलिखितशब्दानां धातुं प्रत्ययं च पृथक् कुरुत –

| क्र. | शब्दः | धातुः | प्रत्ययः |
|---|---|---|---|
| (क) | भ्रमन् | -------- | -------- |
| (ख) | उपविशन् | -------- | -------- |
| (ग) | अनश्नन् | -------- | -------- |
| (घ) | श्रावयित्वा | -------- | -------- |
| (ङ) | आगतः | -------- | -------- |

## (9) निम्नलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| वनेषु | | | |
| पुत्र्याः | | | |
| भूमौ | | | |
| देशस्य | | | |
| मया | | | |

## (10) निम्नलिखितक्रियापदानां धातुं लकारं पुरुषं वचनञ्च लिखत –

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| आसीत् | | | | |
| कथयतु | | | | |
| अभवत् | | | | |
| मरिष्यामः | | | | |
| ददातु | | | | |

## (11) निम्नलिखित-अव्ययानां वाक्यप्रयोगं कुरुत –

**उदाहरणं यथा**

**कदा** – **सः कदा पठति ?**

तदा – -------------- ।

अद्य – -------------- ।

ह्यः – -------------- ।

कृते – -------------- ।

एव – -------------- ।

च – -------------- ।

## योग्यताविस्तारः –

- चम्पा सदृशी वीरबालानां सूचीनिर्माणं कुरुत।

❖ ❖ ❖